श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script. **Download** the font from here

---

# गोदा स्तुतिः

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

श्री विष्णुचित्त कुल नन्दन कल्प वल्लीं
श्री रङ्गराज हरि चन्दन योग दृश्याम् ।
साक्षात् क्षमां करुणया कमलामिवान्यां
गोदाम् अनन्य शरणः शरणं प्रपद्ये ॥ १ ॥

वैदेशिकः श्रुति गिरामपि भूयसीनां
वर्णेषु माति महिमा न हि मादृशां ते ।
इत्थं विदन्तम् अपि मां सहसैव गोदे
मौन द्रुहो मुखरयन्ति गुणास्त्वदीयाः ॥ २ ॥

त्वत् प्रेयसः श्रवणयोर् अमृतायमानां
तुल्यां त्वदीय मणि नूपुर शिञ्जितानाम् ।
गोदे त्वमेव जननि त्वदभिष्ट वार्हां
वाचं प्रसन्न मधुरां मम संविधेहि ॥ ३ ॥

कृष्णान् वयेन दधतीं यमुनानु भावं
तीर्थैर् यथावद् अवगाह्य सरस्वतीं ते ।
गोदे विकस्वर धियां भवती कटाक्षात्
वाचः स्फुरन्ति मकरन्द मुचः कवीनाम् ॥ ४ ॥

अस्माद्दशाम् अपकृतौ चिर दीक्षितानां
अह्नाय देवि दयते यदसौ मुकुन्दः।
तन्निश्चितं नियमितस्तव मौलि दाम्ना
तन्त्री निनाद मधुरैश्च गिरां निगुम्भैः॥ ५॥

शोणाऽधरेऽपि कुचयोरपि तुङ्गभद्रा
वाचां प्रवाहनिवहेऽपि सरस्वती त्वम्।
अप्राकृतैरपि रसैर् विरजा स्वभावात्
गोदाऽपि देवि कमितुर्ननु नर्मदाऽसि॥ ६॥

वल्मीकतः श्रवणतो वसुधात् मनस्ते
जातो बभूव स मुनिः कवि सार्व भौमः।
गोदे किमद् भुतमिदं यदमी स्वदन्ते
वक्त्रारविन्द मकरन्द निभाः प्रबन्धाः॥ ७॥

भोक्तुं तव प्रियतमं भवतीव गोदे
भक्तिं निजां प्रणय भावनया गृणन्तः।
उच्चावचैर् विरह संगमजैर् उदन्तैः
शृङ्गारयन्ति हृदयं गुरवस् त्वदीयाः॥ ८॥

मातः समुत्थितवतीम् अधि विष्णुचित्तं
विश्वोपजीव्यम् अमृतं वचसा दुहानाम्।
तापच्छिदं हिम रुचेरिव मूर्तिमन्यां
सन्तः पयोधि दुहितुः सहजां विदुस्त्वाम्॥ ९॥

तातस्तु ते मधुभिदः स्तुति लेश वश्यात्
कर्णामृतैः स्तुति शतैर् अनवाप्त पूर्वम्।
त्वन्मौलि गन्ध सुभगाम् उपहृत्य मालां
लेभे महत्तर पदानु गुणं प्रसादम्॥ १०॥

दिक् दक्षिणाऽपि परि पक्त्रिम पुण्य लभ्यात्
सर्वोत्तरा भवति देवि तवावतारात्।

यत्रैव रङ्गपतिना बहुमान पूर्वं
निद्रालुनापि नियतं निहिताः कटाक्षाः॥ ११॥

प्रायेण देवि भवती व्यपदेश योगात्
गोदावरी जगदिदं पयसा पुनीते।
यस्यां समेत्य समयेषु चिरं निवासात्
भागीरथी प्रभृतयोऽपि भवन्ति पुण्याः॥ १२॥

नागे शयः सुतनु पक्षिरथः कथं ते
जातः स्वयंवर पतिः पुरुषः पुराणः।
एवं विधाः समुचितं प्रणयं भवत्याः
संदर्शयन्ति परिहास गिरः सखीनाम्॥ १३॥

त्वद् भुक्त माल्य सुरभीकृत चारु मौलेः
हित्वा भुजान्तर गतामपि वैजयन्तीम्।
पत्युस्तवेश्वरि मिथः प्रतिघात लोलाः
बर्हात पत्र रुचिमारचयन्ति भृङ्गाः॥ १४॥

आमोदवत्यपि सदा हृदयं गमाऽपि
रागान्विताऽपि ललिताऽपि गुणोत्तराऽपि।
मौलि स्रजा तव मुकुन्द किरीट भाजा
गोदे भवत्यधरिता खलु वैजयन्ती॥ १५॥

त्वन्मौलि दामनि विभोः शिरसा गृहीते
स्वच्छन्द कल्पित सपीति रस प्रमोदाः।
मञ्जु स्वना मधु लिहो विदधुः स्वयं ते
स्वायंवरं कमपि मङ्गल तूर्य घोषम्॥ १६॥

विश्वायमान रजसा कमलेन नाभौ
वक्षःस्थले च कमला स्तन चन्दनेन।
आमोदितोऽपि निगमैर् विभुरङ्घ्रि युग्मे
धत्ते नतेन शिरसा तव मौलि मालाम्॥ १७॥



rmvenkat@yahoo.com

चूडा पदेन परिगृह्य तवोत्तरीयं
मालामपि त्वदलकै रधिवास्य दत्ताम्।
प्रायेण रङ्गपतिरेष बिभर्ति गोदे
सौभाग्य संपद् अभिषेक महाधिकारम्॥ १८॥

तुङ्गैर् अकृत्रिम गिरः स्वयम् उत्तमाङ्गैः
यं सर्व गन्ध इति सादरमुद्वहन्ति।
आमोदम् अन्यम् अधिगच्छति मालिकाभिः
सोऽपि त्वदीय कुटिलालक वासिताभिः॥ १९॥

धन्ये समस्त जगतां पितुरुत्तमाङ्गे
त्वन्मौलिमाल्य भर संभरणेन भूयः।
इन्दीवर स्रजम् इव आदधति त्वदीयानि
आकेकराणि बहुमान विलोकितानि॥ २०॥

रङ्गेश्वरस्य तव च प्रणयानुबन्धात्
अन्योन्य माल्य परिवृत्तिम् अभिष्टुवन्तः।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधि कत्व समता विषयैर्विवादैः॥ २१॥

दूर्वा दल प्रतिमया तव देह कान्त्या
गोरोचना रुचिरया च रुचेन्दिरायाः।
आसीदनुज्झित शिखावल कण्ठ शोभं
माङ्गल्यदं प्रणमतां मधुवैरि गात्रम्॥ २२॥

अर्च्यं समर्च्य नियमैर्निगम प्रसूनैः
नाथं त्वया कमलया च समेयिवांसम्।
मातश्चिरं निरविशन् निजमाधिराज्यं
मान्या मनु प्रभृतयोऽपि महीक्षितस्ते॥ २३॥

आर्द्रापराधिनि जनेऽप्यभिरक्षणार्थं

रङ्गेश्वरस्य रमया विनिवेद्यमाने ।
पार्श्वे परत्र भवती यदि तत्र नासीत्
प्रायेण देवि वदनं परिवर्तितं स्यात् ॥ २४ ॥

गोदे गुणैर् अपनयन् प्रणतापराधान्
भ्रूक्षेप एव तव भोग रसानुकूलः ।
कर्मानुबन्धि फल दान रतस्य भर्तुः
स्वातन्त्र्य दुर्व्यसन मर्म भिदा निदानम् ॥ २५ ॥

रङ्गे तटिद् गुणवतो रमयैव गोदे
कृष्णाम् बुदस्य घटितां कृपया सुवृष्ट्या ।
दौर्गत्य दुर्विष विनाश सुधा नदीं त्वां
सन्तःप्रपद्य शमयन्त्य चिरेण तापान् ॥ २६ ॥

जातापराधम् अपि माम् अनुकम्प्य गोदे
गोप्त्री यदि त्वमसि युक्तमिदं भवत्याः ।
वात्सल्य निर्भर तया जननी कुमारं
स्तन्येन वर्धयति दष्ट पयोधराऽपि ॥ २७ ॥

शतमख मणि नीला चारु कल्हार हस्ता
स्तन भर नमिताङ्गी सान्द्र वात्सल्य सिन्धुः ।
अलक विनिहिताभिः स्रग्भिर् आकृष्ट नाथा
विलसतु हृदि गोदा विष्णुचित्तात् मजा नः ॥ २८ ॥

इति विकसित भक्तेरुत्थितां वेङ्कटेशात्
बहुगुण रमणीयां वक्ति गोदास्तुतिं यः ।
स भवति बहुमान्यः श्रीमतो रङ्गभर्तुः
चरण कमल सेवां शाश्वतीमभ्युपैष्यन् ॥ २९ ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com